# ३७ सप्तत्रिंश दशकः - विष्णु महत्त्वम्

पुरा हरिस्त्वां किल सात्त्विकेन प्रसादयामास मखेन देवि ।
सुरेषु तं श्रेष्ठतमं चकर्थ स तेन सर्वत्र बभूव पूज्यः ॥ ३७-१॥

अधर्म वृद्धिश्च यदा त्रिलोके धर्मक्षयश्चापि तदा भवत्या ।
धर्मं समुद्धर्तु मधर्म मृद्धं मार्ष्टुं च देव्येष नियुज्यते हि ॥ ३७-२॥

स ईड्यते सर्वत एव सर्वैः पत्न्या च भूतैश्च समं गिरीशः ।
इलावृतेऽपूरुष सन्निधाने सङ्कर्षणाख्यं भजते मुरारिम् ॥ ३७-३॥

तमेव भद्र श्रवसो हयास्यं भद्राश्ववर्षे मुनयः स्तुवन्ति ।
प्रह्लाद उच्चै र्हरिवर्षवासी विश्वार्ति शान्त्यै नृहरिं च नौति ॥ ३७-४॥

श्रीः केतुमाले खलु कामरूपं तं रम्यके मत्स्य तनुं मनुश्च ।
हिरण्मये कूर्म शरीर भाजं स्तुवन्ति नारायण मर्यमा च ॥ ३७-५॥

महावराहं कुरुषूत्तरेषु भू राघवं किम्पुरुषे हनूमान् ।
तं नारदो भारतवर्ष वर्ती नरं च नारायण माश्रयन्ते ॥ ३७-६॥

सत्कर्म भूमि र्भरतस्य राज्यं सन्त्यत्र वैकुण्ठ कथैकसक्ताः ।
तीर्थानि पुण्याश्रम पर्वताश्च जन्मात्र देवाः स्पृहयन्त्यजस्रम् ॥ ३७-७॥

प्रह्लाद पौत्रः सुतलाधिवासः सुरक्षितश्चात्म निवेदनेन ।
वार्धक्यरोग क्लमभीति मुक्तो महाबलि र्वामन मेव नौति ॥ ३७-८॥

सहस्रशीर्षः शिरसा दधत् क्ष्मां हली हरेस्तामस मूर्तिरार्यैः ।
संस्तूयमानः सहनागकन्यः पाताल मूले च सलील मास्ते ॥ ३७-९॥

विचित्ररूपं जगतां हिताय सर्वे स्तुवन्त्यच्युत मिद्धभक्त्या ।
एनं कुरु त्वं वरदानदक्षं मातः कृपार्द्रे वरदे नमस्ते ॥ ३७-१०॥